सप्तम्याम् – दण्डा अस्यां सन्ति दण्डवती शाला इति । इतिकरणो विषयनियमार्थः सर्वत्र सम्बध्यते इत्युक्तम्, तेन क्वचिद् भवत्यपि, [1]कार्यी, हार्यी, तण्डुली, तण्डुलिकः इति ॥

## व्रीह्यादिभ्यश्च । (११६/१९२३)

व्रीह्यादिभ्यः प्रातिपदिकेभ्यः इनिठनौ प्रत्ययौ भवतो मत्वर्थे । मतुब् भवत्येव । व्रीही, व्रीहिकः, व्रीहिमान् । मायी, मायिकः, मायावान् । न च व्रीह्यादिभ्यः सर्वेभ्यः प्रत्ययद्वय[2]मिष्यते । किं तर्हि ?

शिखादिभ्य इनिर्वाच्य [3]इकन् यवखदादिषु (म. भा. २. ३९८) ।

परिशिष्टेभ्य उभयम् । शिखा मेखला सञ्ज्ञा बलाका माला वीणा वडवा [4]अष्टका पताका कर्मन् चर्मन् हंसा इत्येतेभ्य इनिरेवेष्यते । यवखद कुमारी नौ इत्येतेभ्य [5]इकन्नेवेष्यते । परिशिष्टेभ्यो द्वावपि प्रत्ययौ भवतः । व्रीहिग्रहणं किमर्थम्, यावता तुन्दादिषु व्रीहिशब्दः पठ्यते, तत्र इनिठनौ चकारेण विधीयेते ? एवं तर्हि तुन्दादिषु व्रीहिग्रहणमर्थग्रहणं [6]विज्ञायते । शाल्योऽस्य सन्ति शालिनः, शाली, शालिकः, शालिमान् इति । व्रीहिशिखादयः पूर्वं पठिताः ।

यवखद । कुमारी । नौ । 'शीर्षान् नञः' (ग. सू. १३२)–अशीर्षी, अशीर्षिकः ॥

## तुन्दादिभ्य इलच्च । (११७/१९२४)

तुन्दादिभ्यः प्रातिपदिकेभ्य इलच् प्रत्ययो भवति मत्वर्थे । चकाराद् इनिठनौ मतुप् च । तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान् । उदरिलः, उदरी, उदरिकः, उदरवान् ।

तुन्द । उदर । पिचण्ड । घट । यव । व्रीहि । '[7]स्वाङ्गाद्विवृद्धौ च' (ग. सू. १३३)[8] । तुन्दादिः ॥

## एकगोपूर्वाट् ठञ् नित्यम् । (११८/१९२५)

एकपूर्वाद् गोपूर्वाच्च प्रातिपदिकान् नित्यं ठञ् प्रत्ययो भवति मत्वर्थे । एकशतमस्यास्ति इति [9]ऐकशतिकः । ऐकसहस्रिकः । गोपूर्वात् च – गौशतिकः । [10]गौसहस्रिकः । अत[11] इत्येव, एकविंशतिरस्यास्ति इति न भवति । कथम् ऐकगविकः ? समासान्ते कृते भविष्यति । कथं गौशकटिकः ? शकटीशब्देन समानार्थः शकटशब्दोऽस्ति, ततो भविष्यति । अवश्यं च अतः इत्यनुवर्त्यम्, द्वन्द्वोपतापगर्ह्यात् (५. २. १२८/१९३४) इत्येवमाद्यर्थम् । नित्यग्रहणं मतुपो बाधनार्थम् । कथमेकद्रव्यवत्त्वात् इति ? नैवायं साधुः । एकेन वा द्रव्यवत्त्वादिति समर्थनीयम् ॥

## शतसहस्रान्ताच्च निष्कात् । (११९/१९२६)

शतान्तात् सहस्रान्तात् च प्रातिपदिकात् ठञ् प्रत्ययो भवति मत्वर्थे तौ चेत् शतसहस्रशब्दौ निष्कात् परौ भवतः । निष्कशतमस्यास्ति नैष्कशतिकः । नैष्कसहस्रिकः । सुवर्णनिष्कशतमस्यास्ति इति अनभिधानान्न भवति ॥

---

1. कार्यिकः ब, कार्यं हार्यं क. 2. अपि इत्यधिकम् फ. 3. ठन् ड, यवखलादिभ्यः क. 4. इष्टकाः क. इ. 5. ठन् ड. फ. 6. विधीयते क. 7. स्वाङ्गात् वृद्धौ क. फ, च नास्ति ड. 8. खलकर्णोऽस्यास्ति कर्णिलः इत्यधिकम् क. 9. एकशतिकः एकसहस्रिकः ह. 10. गोसहस्रिकः ह. 11. इति वर्तते ग.